**संस्कृत विभाग से.................**



डॉ. बसन्त कुमार मिश्र
संस्कृत शिक्षक

**त्याग–सन्तोष–सेवा–व्रतं संस्कृतम्,**

**विश्वकल्याण–निष्ठायुतं संस्कृतम्।**

**ज्ञान–विज्ञान–सम्मेलनं संस्कृतम् ,**

**भुक्ति–मुक्ति–द्वयोद्भावनं संस्कृतम्।।**

संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा विपुल ज्ञानविज्ञान–सम्पन्ना सरला सुमधुरा हृद्या चेति सर्वैरपि प्राच्यपाश्चात्यविद्वद्भिरेकस्वरेणोररीक्रियते। संस्कृते पदे–पदे नैतिक मूल्यानां चर्चा भवति। नयनं नीतिः, नीतेरिमानि मूल्यानि नैतिकमूल्यानि। यया सरण्या कार्यकरणेन मनुष्यस्य जीवनं सुचारु सफलं च भवति सा नीतिः कथ्यते। इयम् नीतिः केवलस्य जनस्य समाजस्य कृते एव न भवति, अपितु जनानां , नृपाणां समेषां च व्यवहाराय भवति। नीत्या चलनेन, व्यवहरणेन, प्रजानां शासकानां समस्तस्य लोकस्यापि कल्याणं भवति।

पुरातनकालादेव भारते कवयः नीतिकाराः मनोरमया सरसया गिरा नीतिवाक्यानि कथाभिः श्लोकैश्च व्यरचयन्। इत्थं नीतिशास्त्राणि व्यवहारविदे, कान्तासम्मिततयोपदेशयुजे बभूवुः। फलन्त्विदं सम्पन्नं साधारणाः अपि जनाः व्यवहाराय नीतिवाक्यानि नीतिश्लोकांश्च गलबिलाधः कुर्वन्ति स्म। यथा च चाणक्यनीतिः, विदुरनीतिः, विदुलोपाख्यानम्, पंचतंत्रम्, शुक्रनीतिः, घटकर्परकृतः नीतिसारः, सुन्दरपाण्डेयेन कृता 'नीतिद्विषाष्टिका', भल्लाटशतकम्, भर्तृहरिकृतम् 'नीतिशतकम्' 'बल्लालशतकम्', 'दृष्टान्तशतकम्', इत्यादिबहूनि नीतिपुस्तकानि संस्कृते उपलभ्यन्ते।

विचार्यमाणे साहित्ये आदिकालादेव सर्वेष्वपि राष्ट्रेषु अयं विश्वासः प्रचलितः आसीत्, यत् काव्यास्यान्येषु प्रयोजनेषु सत्स्वपि एकं मुख्यं प्रयोजनं नैतिकः परितोषः। प्लेटो–अरस्तु–पेटर–होरेसादिसर्वैः विचारकैः काव्यस्य मुख्यं प्रयोजनं नैतिकविकासः एव स्वीकृतः।

नैतिकमूल्यैः व्यक्तेः सामाजिकी प्रतिष्ठाभिवर्धते। मानवकल्याणाय नैतिकता आवश्यकी। नैतिकतैव व्यक्तेः समाजस्य, राष्ट्रस्य, विश्वस्य कल्याणं कुरुते। नैतिकता चरणेनैव मनुष्येषु त्यागः, तपः, विनयः, सत्यं, न्यायप्रियता एवमन्येऽपि मानवीयाः गुणाः उत्पद्यन्ते। नैतिकतया मनुष्योऽन्यप्राणिभ्यः भिन्नः जायते। तदाचरणेन व्यक्तेः समाजस्य च जीवनम् अनुशासितं निष्कण्टकं च भवति। व्यक्तेः समाजस्य, वर्गस्य, देशस्य च समुन्नयनावसरो लभ्यते। समाजः ईर्ष्या–द्वेषच्छल–कलहादिदोषेभ्यः मुक्तो भवति। अस्माकं सामाजिकाः अन्ताराष्ट्रियाः सम्बन्धाः नैतिकताचरणेन दृढ़ाः भवन्ति। अतः नैतिकताशब्दः सच्चरित्रतावाचकः सुखमयमानवजीवनस्याधारः अस्ति।

इदन्तु सम्यक् वक्तुं शक्यते यत् नैतिकताचरणस्य, नैतिकतायाश्च मुख्यमुद्देश्यं स्वस्य अन्यस्य च कल्याणकरणं भवति। कदाचित् एवमपि दृश्यते यत् परेषां कल्याणं कुर्वन् मनुष्यः

स्वीयाम् हानिमपि कुरुते। एवं विधं नैतिक आचरणं विशिष्टं महत्वपूर्णं च मन्यते। परेषां हितं नैतिकतायाः प्राणभूतं तत्त्वम्।

कदाचित् एवमपि दृश्यते यत्समाजे प्रचलिता रूढ़िः समेषां कृते हितकरी न भवति। अतः प्रबुद्धाः विद्वांसः तस्याः रूढ़ेः विरोधमपि कुर्वन्ति। परं तैः आचरणस्य व्यवहारे नवीन आदर्शः स्थाप्यते। यः कालान्तरे समाजस्य कृते हितकरः भवति। एवं सदाचरणेऽपि परिवर्तनं दृश्यते। परं वस्तुतः यानि नैतिकमूल्यानि सन्ति। तेषु परिवर्तनं न भवति। यथा सनातनो धर्मः न परिवर्तते तथा नैतिकमूल्यान्यपि स्थिराणि एव। एवं धर्मे नीतौ च द्रढीयान् सम्बन्धो दृश्यते। परं द्वयोः भेदोऽपि वर्तते। धर्मशब्दः व्यापकः अस्ति। नीतिस्तु व्याप्या धर्मे एव विलीयते। यानि अवश्यकरणीयानि कर्त्तव्यानि यैः पुण्यानि नोपलभ्यन्ते तेषामपि गणना धर्मे कृता महर्षिभिः धर्माचार्यैः। नीतिः लौकिकं कल्याणं कुरुते। धर्मस्तु लौकिकं पारलौकिकम् च कल्याणं कुरुते। उभयोः कुत्रापि साड्.कर्यमपि प्राप्यते। धर्मः अलौकिकीं शक्तिं प्रकटयति। सः मुक्तेः मार्गमपि प्रशस्तं करोति। परलोकमपि प्रदर्शयति कल्पयति च। नीतिः लौकिकं हितं साधयति। परं नीतिधर्मयोः साहचर्यं सर्वैरेव स्वीक्रीयते।

दार्शनिकैः, धर्माचार्यै पौराणिकैश्च धर्मः परिभाषितः यथा – ''यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः'' यतः यस्मात् कर्मणः, इह लोके कल्याणं जायते, परत्र परलोके च शोभनं स्थानं जनैः लभ्यते नरकापातो न भवेत् येन, स धर्मः। एवम् महाभारते – ध्रियते धर्मः, धारणाद्धर्मः यतः धारयते प्रजाः। धर्मशास्त्रकारेण मनुना –

'' धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।

धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम्।।'' इति

मनुस्मृतौ दशस्वरूपको धर्मः उपवर्णितः। इत्थं धर्माचरणे नैतिकताचरणे च साड्.कार्यमुपलभ्यते। तीर्थाटनम्, पावनासु नदीषु स्नानं, याजनं, गुरुसेवा, मातृ–पित्सेवा, सन्ध्यावन्दनम्, षोडशसंस्काराः एते मुख्यरूपेण धर्मपदवाच्याः। एषु कर्मसु नीतेः मिश्रणं नास्ति। अतः धर्मो व्यापकः धृति–दया–सहिष्णुता–सत्य–परोपकाराद्याचरणेषु द्वयोः साड्.कर्यमस्ति। परमेतत् निश्चितं यत् द्वयोराचरणेन लोकस्य परमं कल्याणं जायते एव। नीतिकाराणां मते इमे नैतिकतायाः गुणाः यथा– जीवहिंसायाः विरक्तिः, परधनापहरणान्निवृत्तिः, सत्यभाषणं, पैशुन्यात् निवृत्तिः, सत्पात्रेभ्यः दीनेभ्यश्च दानम्, अतिलोभात् वितृष्णा, दया, सहिष्णुता, परोपकारः, गुरुजनेष्वनुरागः, श्रद्धा, विनयशीलता च। अनुत्सेकः, आतिथ्यम्, न्याय आवृत्तिः, परगुणेभ्यः ईर्ष्याऽभावः, सत्सड्.गानुरक्तिः, दुष्टसड्.गान्निवृत्तिः, विपदि धैर्यम्, अभ्युदये क्षमा, सदसि वाक्पटुता, समयस्य सदुपयोगः, इत्यादयः नैतिकताचाराः एषामाचरणेनैव व्यक्तेः समाजस्य, राष्ट्रस्य, विश्वस्य च सर्वथा कल्याणं सम्पद्यते। अन्ते–

''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।''

---